श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७१

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७१

*केशिमथनवर्णनं व्योमवधवर्णनं च*

यत्नेषु सर्वेष्वपि नावकेशी
    केशी स भोजेशितुरिष्टबन्धुः।
त्वां सिन्धुजावाप्य इतीव मत्वा
    सम्प्राप्तवान् सिन्धुजवाजिरूपः॥ १ ॥

गन्धर्वतामेष गतोऽपि रूक्षै-
    र्नादैः समुद्वेजितसर्वलोकः।
भवद्विलोकावधि गोपवाटीं
    प्रमर्द्य पापः पुनरापतत् त्वाम्॥ २ ॥

तार्क्ष्यार्पिताङ्घ्रेस्तव तार्क्ष्य एष
    चिक्षेप वक्षोभुवि नाम पादम्।
भृगोः पदाघातकथां निशम्य
    स्वेनापि शक्यं तदितीव मोहात्॥ ३ ॥

प्रवञ्चयन्नस्य खुराञ्चलं द्रा-
    गमुं च चिक्षेपिथ दूरदूरम्।
सम्मूर्च्छितोऽपि ह्यतिमूर्च्छितेन
    क्रोधोष्मणा खादितुमाद्रुतस्त्वाम्॥ ४ ॥

त्वं वाहदण्डे कृतधीश्च वाहा-
    दण्डं न्यधास्तस्य मुखे तदानीम्।
तद्वृद्धिरुद्धश्वसनो गतासुः
    सप्तीभवन्नप्ययमैक्यमागात्॥ ५ ॥

www.prapatti.com

आलम्भमात्रेण पशोः सुराणां
    प्रसादके नूत्न इवाश्वमेधे।
कृते त्वया हर्षवशात् सुरेन्द्रा-
    स्त्वां तुष्टुवुः केशवनामधेयम्॥ ६॥

कंसाय ते शौरिसुतत्वमुक्त्वा
    तं तद्वधोत्कं प्रतिरुध्य वाचा।
प्राप्तेन केशिक्षपणावसाने
    श्रीनारदेन त्वमभिष्टुतोऽभूः॥ ७॥

कदापि गोपैः सह काननान्ते
    निलायनक्रीडनलोलुपं त्वाम्।
मयात्मजः प्राप दुरन्तमायो
    व्योमाभिधो व्योमचरोपरोधी॥ ८॥

स चोरपालायितवल्लवेषु
    चोरायितो गोपशिशून् पशूंश्च।
गुहासु कृत्वा पिदधे शिलाभि-
    स्त्वया च बुद्ध्वा परिमर्दितोऽभूत्॥ ९॥

एवं विधैश्चाद्भुतकेलिभेदै-
    रानन्दमूर्छामतुलां व्रजस्य।
पदे पदे नूतनयन्नसीमां
    परात्मरूपिन् पवनेश पायाः॥ १०॥

**********



www.prapatti.com